# 2018

# CBCS

## 1st Semester

## SANSKRIT

### PAPER—C1T

### (Honours)

*Full Marks : 60*

*Time : 3 Hours*

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

1. अधोलिखितेषु सुरगिरा देवनागर्या च पूर्णवाक्येन **दश** प्रश्नाः समाधेयाः 2×10

(क) जगतः पितरौ कौ ? तौ कौ इव सम्पृक्तौ ?

(ख) रघुवंशे कालिदासस्य गतिः कीदृशी भवति ?

(ग) दिलीपस्य गुणाः कथं सप्रसवा अभवन् ?

(घ) "विवेश कश्चिज्जटिलस्तपोवनम्" — अत्र 'जटिलः' कः ? तस्य प्रवेशः कविना केन सह उपमितः ?

(Turn Over)

(ङ) "तपोवनं तच्च बभूव पावनम्" — कथं तपोवनस्य पावनत्वं सम्पादितम् ?

(च) कथं पुराविदः पार्वतीम् अपर्णेति वदन्ति ?

(छ) महात्मभिः समं विरोधः केन हेतुना वरम् ?

(ज) "न बाधतेऽस्य त्रिगणः परस्परम्" — कस्य त्रिगणः कथं न बाधते ?

(झ) केन प्रकारेण दुर्योधनो धर्मविप्लवं निहन्ति ?

(ञ) किं सुखमाराध्यम् ? कं नरं ब्रह्मापि न रञ्जयति ?

(ट) सर्वविदां समाजे अपण्डितानां विभूषणं किम् ? पुरुषं किं समलंकरोति ?

(ठ) भर्तृहरिमते के तावत् मर्त्यलोके मनुष्यरूपधारिणो मृगाः?

(ड) अश्वघोषरचितं महाकाव्यद्वयं किम् ?

(ढ) किरातार्जुनीयमिति महाकाव्ये 'किरातः कः ? महाकाव्यस्यास्य मुख्यरसः कः ?

(ण) भट्टिकाव्यस्य नामान्तरं किम् ? काव्यस्यास्य सर्गसंख्या का ?

**2.** अधोलिखितेषु **प्रश्नचतुष्टयं** समाधेयम् (एकस्य प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागर्या प्रदेयम्) : 4×5

(क) प्रसङ्गेन सह व्याख्या कार्या :

मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।

प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

*अथवा*

इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।।

(ख) प्रसङ्गेन सह व्याख्या कार्या :

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संश्रणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः।।

*अथवा*

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि।।

(ग) भावसम्प्रसारणं कार्यम् –

न धर्मवृद्धेषु वयः समीक्ष्यते।

*अथवा*

कुत्स्याः स्युः कुपरीक्षका न मणयो चैरर्धतः पातिताः।

(घ) विषयमेकमाश्रित्य संक्षेपेण टीका लेखनीया –

शिशुपालवधम्, नैषधचरितम्, चौरपञ्चाशिका।

(ङ) व्याकरणदिशा **पञ्चानां** पदानां प्रकृतिप्रत्ययौ प्रदर्शनीयौ –

संश्रृणुते, भ्रान्तम्, शास्ति, गमिष्यामि, नियन्तुम्, अनुशासती, प्रतीपयेत्।

(च) (i) व्यासवाक्येन सह **पदद्वयस्य** समासो निर्णेयः – 2×2

किम्प्रभुः उद्बाहुः, ध्रुवेच्छाम्।

(ii) सन्धिविच्छेदं कुरु – 1×1

हितान्न *अथवा* सुरेन्द्रभवनेष्वपि।

**3. प्रश्नद्वयं** समाधेयम् – 2×10

(क) रघुवंशमहाकाव्यमाश्रित्य रघुवंशीयानां नरपतीनां चरित्रवैशिष्ट्यानि उल्लेखनीयानि।

(ख) पार्वत्याः तपस्यायाः वर्णनं कुरुत।

(ग) वनेचरस्य वक्तव्यस्य सारसंक्षेपो लेखनीयः।

(घ) मेघदूतस्य गीतगोविन्दस्य च साहित्यिकमूल्यं निरूप्यताम्।

---